दिनाङ्क :- 30.03.2024

प्रात: - 06:55

विदेशमन्त्री डॉ. एस जयशंकरः

विदेशमन्त्री डॉ. एस जयशंकरः युक्रेनदेशस्य समकक्षीयेण दमित्रो कुलेबा इत्यनेन समं ह्यः नवदिल्लीनगरे एकस्मिन् सत्रे रूस-युक्रेन-सङ्घर्षस्य विषये व्यापक-शाखाविषये च चर्चां कृतवान्। आभासीयमाध्यमेन डॉ जयशंकरः अवदत् यत् सः परस्परहितसम्बन्धे वैश्विकक्षेत्रीयविषयेषु च चर्चाम् अकरोत्। सः द्विपक्षीयसहकार्य-सहितं समग्रसम्बन्धं सुदृढं कर्तुं भारतस्य प्रतिबद्धतां पुनः स्मारितवान्।

सम्मेलनावधौ स्वस्य उद्घाटनवक्तव्ये डॉ. जयशङ्करः अवदत् यत्, युक्रेनदेशस्य विदेशमन्त्रिणः भारतयात्रया युक्रेनदेशस्य स्थितिं ज्ञातुं अवसरः प्राप्यते। सः अवदत् यत् गतमासैः तेषां विभिन्नस्तरयोः अन्त: क्रियाः अभवन्, केचन द्विपक्षीयतन्त्राणि अपि मिलितानि, येन द्विपक्षीयसम्बन्धेषु जवता उत्पन्ना। युक्रेनदेशस्य विदेशमन्त्री परह्यः द्विदिवसीययात्रायां भारतम् आगतो वर्तते।

भारतरत्न

राष्ट्रपतिपदासीना द्रौपदीमुर्मू: अद्य राष्ट्रपति-भवने भारत-रत्न पुरस्काराः प्रदास्यति। पूर्वप्रधानमन्त्रिणे चौधरी चरणसिंहाय, पी वी नरसिंहाराव महोदयाय, बिहारस्य पूर्व-मुख्यमन्त्रिणे कर्पूरीठाकुराय, प्रख्यात-वैज्ञानिकाय एम. एस. स्वामिनाथनवर्याय पूर्व उपप्रधानमन्त्रिणे भाजपेति दलस्य च वरिष्ठनेत्रे लालकृष्ण-आडवाणी वर्याय च देशस्य शीर्षस्थः नागरिकपुरस्कारः प्रदीयते।

प्रधानमन्त्री – बिल् गेटस्

प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् डिजिटलसार्वजनिकसंरचना स्वतः एव महती आवश्यकता अस्ति तथा च सर्वकारः डिजिटलसुविधाः सर्वेषु ग्रामेषु विस्तारयति। परोपकारिणा बिल गेट्स् इत्यनेन सह संवादं कुर्वन् श्रीमोदी अवदत् यत् कृषिक्षेत्रे, स्वास्थ्ये, शिक्षायां च प्रौद्योगिक्याः महती भूमिका भवितुम् अर्हति। प्रधानमन्त्री अवदत् यत्, यदा सः विश्वे अङ्कीयविभाजनस्य विषये शृणोति स्म तदा सः निश्चयं कृतवान् यत् भारते एतादृशं किमपि न भवितुम् अर्हति इति। कृत्रिममेधायाः आर्टिफिशियल इन्टेलिजेन्स् इत्यस्मिन् विषये तेनोक्तं यत् यदि वयं आलस्यकारणेन एआइ इत्येतस्मिन् अवलम्बामहे तर्हि अयं असमीचीनः मार्गः एव। सः इदमपि अपि अवदत् यत् यदि ऐन्द्रजालसाधनरूपेण उपयुज्यते तर्हि एआइ सम्भवतः गभीरम् अन्यायं जनयिष्यति।

आयकर - काङ्ग्रेसः

आयकरविभागेन काङ्ग्रेस दलाय त्रयोविंशत्योत्तर-अष्टशताधिक-एकसहस्र- कोटिरूप्यकाणां नवीनं प्रत्यवाप्तिसूचना प्रदत्ता। आधिकारिकस्रोतानुसारी प्रकरणोयं विगतेषु केषुचित् वर्षेषु करदायित्वेन सम्बद्धम् अस्ति। काङ्ग्रेस दलस्य अध्यक्षेण मल्लिकार्जुनखर्गे इत्यनेन आरोपितः यत् आयकरविभागस्य उपयोगः प्रमुखविपक्षदलं उत्पीडनाय शस्त्ररूपेण क्रियते।

इजरायल-सीरिया

सीरियायां ह्यः अलेप्पा-प्रान्ते इजरायलदेशस्य वायुप्रहारेन षट्त्रिंशत् सीरियासैनिकैः सह चत्वारिंशत् अधिकाः जनाः मृताः। चतुर्विंशतिहोरासु एषा द्वितीया एतादृशी प्रकरणं आसीत्। प्राप्त सूचनानुसारी इजरायलस्य वायुप्रहारकैः लेबनानस्य हिज्बुल-सङ्घस्य रॉकेट इति प्रक्षेपास्त्र भंडारं अभिलक्ष्य प्रहारं विहितम्।

आईपीएल

आईपीएल क्रिकेट्-क्रीडायां ह्य: बैंगलूरूनगरस्य एम चिन्नास्वामी-क्रीडाङ्गणे कोलकाता-नाईटराइडर्स-दलेन रॉयल-चैलेंजर्स-बैंगलूरू-इत्येतं दलं सप्तस्तोभै: पराजितम्। तत्रैव अस्मिन् क्रिकेटमालिका-स्पर्धायां अद्य लखनऊ स्थितस्य अटल-बिहारी-वाजपेयी-एकाना-क्रिकेट-क्रीडाङ्गणे लखनऊ-सुपर-जायंट्स, पंजाब-किंग्स इत्येतयो: दलयो: मध्ये स्पर्धा सायं सार्धसप्तवादने भविष्यति।